
जलाशयारामोत्सर्गमयूखः भास्करे

४७२५



मजू प्रकतमणि मूल्या से
१॥०

१४ पुस्तकमिदं शैवोपनामकभानुदेवात्मजनंदरामस्य पत्राण्यष्टादश १५



उ०

।।१।। ॥ ॥श्रीगणेशाय नमः॥ ॥उत्क्रादनीविधिं नामं नाम भाराद्युम्नभास्करं॥ उत्सर्गविषये भट्टनीलकंठो वदत्यथ॥ तत्र
जलाशयोत्सर्गे प्रशंसा विष्णुधर्मोत्तरे॥ उदकेन विना हृप्तिर्नास्ति लोकद्वये सदा॥ तस्माज्जलाशयाः का
र्याः पुरुषेण विपश्चिता॥ ॥यमः॥ ॥कूपारामप्रपाकारी तथा वृक्षावरोपकः॥ कन्यादः सेतुकारी स्वर्गं प्राप्नोत्य
संशयं॥ तथा॥ तडागे यस्य पानीयं सततं स्वच्छं तिष्ठति॥ स्वर्गे लोके गतिस्तस्य नात्र कार्या विचारणा॥ नांदि
पुराणे॥ ॥ यो वापीमथवा कूपं देशे तोयविवर्जिते॥ खानयेत्स नरो याति स्वर्गं जित्यशतं समाः॥ विष्णुः॥ कूपा
रामतडागेषु देवतायतनेषु च॥ पुनः संस्कारकर्त्ता च लभते मौलिकं फलं॥ तथा॥ सेतुबंधरतायेव तीर्थ
शौचरताश्च ये॥ तडागकूपकर्त्तारो मुच्यंते ते तृषाभयात्॥ तीर्थशौचं मन्नोत्थियं काद्यपसारहीं॥ भविष्यो
त्तरे॥ सर्वस्वेनापि कौंतेय भूमिष्ठमुदकं कुरु॥ कुलानि तारयेत्कर्त्ता यत्र गोर्वितृषा भवेत्॥ अतः शुभाग
तद्रूपी तडागादिषु योजयेत्॥ धन्यः स पांथविज्ञेयस्तडागं स्वस्य मंडितं॥ पीत्वा तोयं च मार्गस्था विश्रमंति राम
रमंति च॥ पानीयशोधनं कृत्वा ह्रदे देवविनिर्मिते॥ प्रणालकरणं तत्र तत्प्रमाणोत्यनुत्तमां॥ गृहादौ कूपादि

।।१।।

ग्विशेषफलं देवीपुराणे॥ एवमाभ्रत्यकर्त्तव्यं तस्योत्तरपथेपिवा॥ न पूर्वं व्यत्ययं कुर्यान्मठाद्देवालयगृहात्॥
कृतं भयप्रदं लोके तथा विश्वाग्निजं भयं॥ वायव्यं वापि देवस्य भयदं जायते कृतं॥ वराहमिहिरः॥ पुष्टि
भूतिपुत्रहानिं पुरस्त्रीनाशं मृत्युं संपदं शास्त्रबाधां॥ किंचित्सौख्यं दिक्षु पूर्वादि कुर्यात्कूपो मध्ये गेहम
र्थक्षयं चेत्यादि॥ जलाशयारंभकाले विष्णुधर्मोत्तरे॥ स्थिरे लग्ने स्थिरांशे च कर्त्तुश्चोपचयान्विते॥ तथा
यस्य सौम्यग्रहाः केंद्रे त्रिकोणे चापि भार्गव॥ पापश्चोपचयस्थाने तस्मिन्कार्यं निवेशनं॥ प्रासादे चैव मे
तस्यात्कूपवापीषु चैव हि॥ केंद्रसंज्ञा प्रथमचतुर्थसप्तदशमस्य। त्रिकोणं नवपंचमं। त्रिषट्दश एकादशाः
उपचयानि॥ वृक्षारोपणेपि वराहसंहितायां। ध्रुवमृदुमूलविशाखास्वातीगुरुभश्रवणं तथाश्विनहस्तौ॥ शस्ता
नि दिग्भिः पादपसंरोपणे भानि॥ गुरुमे पुष्यः॥ जलाशयोत्सर्गकालो भविष्योत्तरे॥ तस्मिन्सलिलसंपूर्णे
कार्त्तिके च विशेषतः॥ तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः॥ मुनिभिः केचिदिच्छंति पूर्तौ तेचात्र
शायणे॥ न कालनियमस्तत्र सलिलं तत्र कारणं॥ दीपिकायां मार्त्तंडे दृढ ध्रुवे ऽमरजिदशयने माघ षट्कस्पर
त्के मूलाषाढोत्तराश्विश्रवणगुरुकरे पौष्णशाक्राजवाजे॥ मैत्रे ब्राह्मे च पूर्णा मदनरवितिथौ स
द्वितीयास्तृतीया कार्या तोयप्रतिष्ठा ज्ञगुरुसितदिने कालशुद्धौ स्थलग्ने॥ मार्त्तंडः सूर्यः। इंदुश्चंद्रः। उडु नक्षत्रं॥

ज०उ०
॥२॥

एषांशुद्धिर्बलं॥मृदुर्जी।ध्रुवं:तस्याशयनेप्रबोधे।गुरुः पुष्यः।क्रूरोहस्तः।पौष्णंरेवती॥शाक्रंज्येष्ठा॥चरं
मृगः।मैत्रमनुराधा।ब्राह्म्यरोहिणी।पूर्णापंचमीदशमीपौर्णिमाः।मनत्रयोदशी।रविसप्तमी।ज्ञोबुधः।सि
तःशुक्रः॥ वह्निपुराणे॥ संक्रांतिभेदेनफलविशेषउक्तः॥ वापीकूपतडागानीतस्मिन्कालेविधिः
स्मृतः॥ सुदिनेशुभनक्षत्रेप्रतिष्ठाशुभदास्मृता॥ कर्कटेपुत्रलाभश्चसौख्यंतुमकरेभवेत्॥ मी
नेयशोर्थलाभश्चकुंभेवस्तुबहूदकं॥ वृषेचमिथुनेवृद्धिर्वृश्चिकेचजलंभवेत्॥ पित्रतस्त्रिस्त्रकन्या
यांतुलायांशाश्वतीगतिः॥ सिंहेमेषेधनुर्नाशंजलस्य।द्विजयच्छतीति॥ अत्रायंसंग्रहोवर्ज्योवर्ज्ययोः॥
अधिकलुप्तसंवत्सरसिंहमकरस्थाबृहस्पतावस्तमितेबालेवृद्धेगुरौशुक्रेचवक्रेतिचारिणीचगु
रौगुर्वादित्येमलमासेक्षयमासेलुप्तदिनद्वयवतिपक्षेवमदिनादौभूकंपाशन्युल्काद्युद्भूतदोषे
चवर्ज्यः॥ उत्तरायणेमाघफाल्गुनचैत्रवैशाखज्येष्ठाषाढान्यतममासेषुरविशुद्धावयनद्वयविषु
वद्वयकन्यामीनधनुरन्यतमसंक्रांतौशुक्लपक्षेद्वितीयानवमीसप्तमीदशमीपौर्णमासीनामन्यत राम
मतिथौशनिमंगलान्यवारेषुभरणीकृत्तिकार्द्रापुनर्वस्वाश्लेषापूर्वाफाल्गुनीविशाखाव्यतिरिक्तनक्षत्रे
षुविष्कुंभातिगंडव्याघातवज्रव्यतीपातपरिघवैधृतिव्यतिरिक्तेयोगेषुकर्त्तव्यंइताराविशुद्धौबुधशुक्र ॥२॥

गुरुसितपक्षचंद्रनिरीक्षितेलग्ने जलाशयोत्सर्गः कार्यः इति॥ बह्वृचगृह्यपरिशिष्टे॥ अथा
तो वारुणविधिर्वापीकूपतडागयज्ञं व्याख्यास्यामः पुण्ये तिथिकरणे शुभे नक्षत्रे प्राचीं दिशमा
स्थाय प्राक्प्रवणे उदक्प्रवणे चोदकसमीपेऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वाज्यभागौ तं कृ
त्वाज्याहुतीर्जुहुयात्॥ समुद्रज्येष्ठेति प्रत्यृचं ततो हविषोऽष्टाभिर्जुहुयात्त्वां नो ब्रह्मणा वंद
मान इति पंचर्चा त्वन्नो अग्ने वरुणस्य विद्वानिति च द्वे इमं मे वरुण श्रुधी हवमद्येति स्विष्टकृतं च
नवतीं नवत्यैः प्राणाः प्राणावाऽश्रीमत्स्मादापान व भिर्जुहोति मार्जनी ते धेनुं तारयेत्त्ववती
र्यमाणमनुमंत्रयेत्॥ इदं पवित्रं सलिलं कुरुष्व शुद्धाः प्रतापमतः संतु नित्यं॥ मां तारयंती
कुरु तीर्थाभिषेकं लोकाल्लोकांतरे तीर्यते वेति॥ पुच्छाग्रे स्वयं लग्नो न्वारब्धउत्तीर्यापो अस्मा
न्मातरः शुंधत्विति तथा परात तायां दिश्युत्थापयेत्सर्ववसाङ्गवती हि मह्या इति हिंकरोति चेद्धि
ङ्कृण्वती वसुपत्नी वसूनामिति सचैलकंठां कांवनश्रृंगीं वृषभजां सैपि सुरां कांस्यापदोहि
नां विप्राय दद्यादितरां वा शक्त्या दक्षिणां ततउत्सर्गं कुर्यात्॥ देवा पितृमनुष्याः प्रियंतामिति

ज० उ० पठित्वोत्सृजेत इत्याह शौनको ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयित इति सिं। द्विभ्रोजलाशयो
॥२॥ त्सर्गे विधिः॥ ॥विस्तरतस्तु मान्ये॥ श्रीएकराज [illegible] महाबाहो तडागादिषु यो विधिः॥ पुराणे वि
त्तिहासोयं पठ्यते च तथान्य॥ प्राप्य शुक्लं शुभं पक्षं अतीते चोत्तरायणे॥ पुण्येह्नि विप्रकथि
ते कृत्वा ब्राह्मणवाचनं॥ प्रागुदक्प्रवणे देशे तडागस्य समीपतः॥ चतुर्हस्तां तथा वेदीं चतुर
स्रां चतुर्मुखां॥ चतुर्हस्तेति मंडपत्रिभागव्यावृत्तिः॥ सिद्धांतशेखरे तु। तडागादिप्रतिष्ठायां प
द्मिनी पद्मसन्निभेत्युक्तं॥ पद्मिनीति वेदीनाम तदुक्तं तत्रैव चतुः पंचसप्तनवैकादशान्य
तमभागेन सर्वमेवोक्तं॥ मंडपनिर्णये। तथा षोडशहस्तः स्यान्मंडपश्च चतुर्मुखः॥ यद्यपि
तडागस्य समीप इत्यविशेषेणोक्तं तथापि मंडपादि तडागात्प्राच्यामुदीच्यामीशान्यां प्रतीच्यां
वा कार्यं। तडागात्पश्चिमे सर्वं ईशान्यामुत्तरे वा॥ आदौ तु मंडपः कार्यः सर्वलक्षणसंयुतं॥
इति वचनादि सांप्रदायिकाः॥ अत्र विशेषो भविष्योत्तरे। तडागपालीशीर्षे तु मंडपं कारयेच्छुभ राम
मिति॥ वेद्याश्च परितो गर्त्ता रत्निमात्रास्त्रिमेखलाः॥ नवसप्ताथवा पंच येनिवक्त्रान्मंडपात्मकं॥
गर्त्ताः कुंडानि यानि रेनवक्त्रे येषां तयोनिवक्त्राः। तत्रैव पक्षे। ईशानकोणस्य मध्यस्थं न कार्यं। उ ॥२॥

पर्संज्ञातविरोधितया तद्बाधस्येव न्यापकत्वात् ॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलविस्तृता ॥
गर्ताश्च तत्र शस्ताः स्युस्त्रिपर्वोच्छ्रितमेखला ॥ त्रिपर्वोच्छ्रिता सम्यगुल्लोच्छ्रिताः ॥ सर्वतश्च सवर्णाः स्युः पता
द्व काञ्जसंयुताः ॥ सवर्णा इंद्रादिलोकपालैः ॥ अश्वत्थोदुंबरप्लक्षं वटशाखाभवानि तु ॥ मंडपस्य प्रति
दिशं द्वाराण्येतानि कारयेत् ॥ द्वाराणि तोरणानीति केचित् ॥ यथाक्रमं तमेव युक्तौ । तदा वतोरणान्यपि
द्वारकाष्ठँमयान्येतेषां द्वारीगत्वात् । शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै ॥ न्यष्टौ कुडपकाः कार्या
ब्राह्मणा वेदपारगाः ॥ सर्वलक्षणसंपूर्णो मंत्रवित्तो जितेंद्रियः ॥ कुलशीलसमायुक्तः स्थापकः स्या
द्द्विजोत्तमः ॥ स्थापको गुरुः । प्रतिगर्ते तु कलशान् यज्ञोपकरणानि च ॥ व्यजनं वासनं शुभ्रं ताम्रपा
त्रं तु विस्तरे ॥ प्रतिगर्ते मेकैकः कलशास्सति हेमाद्रिः ॥ बहुवचनात्प्रतिगर्तेपदाद्यप्रतिकुंडं त्र्यस्र
य इति तु सम्यक् ॥ ततस्त्वनेकवर्णाः स्युर्बलयः प्रतिदैवतं ॥ आचार्यः प्रक्षिपेद्भूमौ स्वनुमेत्याचिचक्षणः ॥
श्चरत्निमात्रो यूपः स्यात्क्षीरवृक्षविनिर्मितः ॥ यजमानप्रमाणो वा स स्थाप्यो भक्ततिष्ठता ॥ सवाष्टास्रश्च
बालयुतः कार्यः । वषाल[illegible]नुजपितृतत्परिमाणमध्य एव यूपे विशेषो भविष्य । कदंबाश्वत्थपाला
वैकंकतमयः शुभाः । भूडुस्रयूपो निर्दिष्टः सारदारुमयो घवेति । त्रैवर्णिकानी कदंबकादि

उ० उ०
॥४॥

नियमएवभूद्रस्यानियमइत्यर्थः॥ तन्निखननस्थानेनारदीये। तडागोत्तरतश्चैव यूपस्थानप्रकीर्तित
मिति॥ एर्वेकूडात्प्राच्यांपदामात्रांतरितेदेशइतिरूपनारायणीये॥ ऊनाशयमंडपांतराल इतिकेचित्॥
ईशानेपुनिषातस्यन्यसेद्यूपंयथोदितमितिकेचित्॥ एतत्पक्षत्रयमूलविमर्शकार्यः। हेमाद्रीकारणःका
र्याः पंचविंशतिसत्विजः॥ कुंडलानिचहेमानि केयूरकटकानिच। तथांगुलिपवित्राणि वासांसिविवि
धानिच॥ दक्षयेच्चसमंसर्वाच्चार्याद्विगुणंपुनः॥ दद्याच्छयनसंयुक्तमात्मनश्चापियत्प्रियं॥ सौवर्णौ
कूर्ममकरौ राजतौमत्स्यडुंडुभौ॥ ताम्रौकुलीरमंडूकौ लोहायसःशिशुमारकः॥ डुंडुभोराजिलः निर्विषः
सर्पः। कुलीरःकर्कटः। कूर्मादयः सप्तवेद्यांवारुणमंडले आसाद्याः। एवमासाद्यतान्सर्वानादौवेववि
शेषतः॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः॥ सर्वौषध्युदकस्नानस्नापितोवेदपुंगवैः। यजमा
नःसपत्नीकः पुत्रदारसमन्वितः॥ पश्चिमद्वारमाश्रित्यप्रविशेद्यागमंडपं॥ ततोमंगलशब्देनभेरीणां
निःस्वनेनच॥ रजसामंडलंकुर्यात्पंचवर्णेनतत्त्ववित्॥ षोडशारंततश्चक्रंपद्मगर्भंचतुर्भुजं॥ चतुर
स्रंचपारतोवृत्तंमध्येसुशोभनं॥ वेद्याश्चोपरितत्कुर्याद्ब्रह्मान्लोकपतींस्तथा॥ विन्यसेन्मंत्रतःसर्वान् राम ॥४॥
प्रतिदिक्षुविचक्षणः॥ ऊष्मादीन्स्थापयेन्मध्येवारुणंमंत्रमाश्रितः॥ ब्रह्माणंचशिवंविष्णुंतत्रैवस्थापयेद्बुधः॥

ये

विनायकं च विन्यस्य कमलामंबिकां तथा॥ शांत्यर्थं सर्वलोकानां भूतग्राम न्यसेत् ततः॥ पुष्पपत्रफलैर्युक्तं
भक्ष्यभोज्यैश्च पूजयेत्॥ पठध्वमिति तान्ब्रूयाद्द्वार्यांश्च पूजयेत्॥ बह्वृचौ पूर्वतः स्थाप्यौ दक्षिणे नयजुर्वि
दौ॥ सामगौ पश्चिमे स्थाप्यावुत्तरेण त्वथर्वणौ॥ उदङ्मुखो दक्षिणतो यजमान उपविशेत्॥ यजध्वमि
ति तान्सर्वान्होतृकान्पुनरेव तु॥ उत्कृष्टमंत्रजाप्येन तिष्ठध्वमिति जापकान्॥ एवमादिश्य तान्सर्वान्
प्रयुज्याग्निं च मंत्रवित्॥ जुहुयाद्वारुणैर्मंत्रै राज्यं च समिधस्तथा॥ सवित्रिभिश्चैव होतव्या वारुणैरेव सर्वशः॥
ग्रहेभ्यो विधिवद्धुत्वा तथैंद्रायेश्वराय च॥ मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्मणे॥ रात्रिसूक्तं च रौद्रं
चं पावमानं सुमंगलं॥ जपेत्तु पौरुषं सूक्तं पूर्वतो बह्वृचाग्रकः॥ शाक्रं रौद्रं च सौम्यं च कौष्मांडं जातवेदसं॥
सौरं सूक्तं जपेरस्ते दक्षिणे नयजुर्विदः॥ वैराजं पौरुषं सूक्तं सौवर्णं रुद्रसंहितां॥ शैशवं पंचनिधनं गाय
त्रं ज्येष्ठसाम च॥ वामदेव्यं बृहत्सौम्यं सैरवं सरथंतरं॥ गवाव्रतं विकर्णं च रक्षोघ्नं च यथाक्रमं॥ गायंति सा
मगा राजन्पश्चिमं द्वारमाश्रिताः॥ आथर्वणाश्चोत्तरतस्तथा शांतिकपौष्टिकौ॥ प्रागादि जाप्यानि विशेषतः
प्रयोजे दर्शयिष्यामि॥ जपेरन्मनसा देवमाश्रिता वरुणं सदा॥ एवं तु रभितो राज्ञा वेदिकां कृत्वाधिवासनं॥
गजाश्च रथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ मृदमानीय कुंभेषु प्रक्षिपेच्चत्वरात्तथा॥

ज॰उ॰ ॥५॥

5

सौवर्णौ वे वसिद्धार्थो नगौधान्यं गुल्मेव च ॥ स्नपनं तस्य कर्तव्यं पंचभंगसमन्वितैः ॥ भंगाः पंचनवाः सर्व
कर्तुर्महामंत्रैरेवं कृत्वा विधानतः ॥ स्नपने वस्त्रयुग्मं दद्यात् ग्राह्यं कार्यं । परदिन कृत्यमाह ॥ एवं क्षपा नीतीव ह्य
विधिदृष्टेन कर्मणा ॥ ततः प्रभाते विमले संजाते धेनवांश्च तं ॥ ब्राह्मणेभ्यः प्रदातव्यमष्टषष्टिमथवा पुनः ॥ पं
वाशद्वाथषड्विंशा सप्तविंशतिवा पुनरिति ॥ ततः सांवत्सरैर्युक्तो कृतशुद्धे लग्ने शुभे ॥ वेदशास्त्रैः सगंधर्वैः
वाद्यैश्च विविधैः शुभैः ॥ कृत्वा कालं कृतीकृत्वा तत्र गामवतारयेत् ॥ सांवत्सरा देवज्ञाः ॥ सा गामाय प्रदेया सा
ब्राह्मणाय विशांपते ॥ सा मगः प्रकृतं एवाग्नीयीन्यायपात् ॥ जलाशये कुक्षिदृता सूत्रेण परिवेष्टयेत् ॥ पात्रीमा
मादाय सौवर्णीं पंचरत्नसमन्विती ॥ ततो निक्षिप्य मकरं मत्स्यादीस्तांश्च सर्वतः ॥ धतीं चतुर्भिर्विप्रैः स्कंधे
दवेदांगपारगैः ॥ महानदीजलोपेतीं दध्यक्षतविभूषितैः ॥ उत्तराभिमुखैर्न्युब्जं जलमध्ये तु कारयेत् ॥
आथर्वणेन साम्ना तु पुनर्मामै[illegible]त्विति वा ॥ आपो हि ष्ठेति मंत्रेण । क्षिप्त्वा गत्य च मंडप ॥ अथर्वणा शं नो देवीरि
त्यस्याम्नविगीत ॥ अजविशेषो भविष्य ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलं ॥ रमंतु सर्वभूतानि स्ना
नपानावगाहनैः ॥ एवं जलं जलं क्षिप्त्वा पूजयेज्जलमंतरः ॥ तोष्या कर्मकराः सर्वे कुद्दालानि च पूज
येदिति ॥ पूजयित्वा सदस्यांश्च बलिं दद्यात्समंततः ॥ सदस्याः ऋत्विजः । समंततो मंडपस्य । पुनर्दिनानि राम

॥५॥

होतव्यं चत्वारि [illegible] मुनिसत्तमाः। होमस्तु पूर्वोक्त एव प्रत्यहमावर्त्तनीयः॥ चतुर्थीकर्म कर्त्तव्यं देयोत

त्रापि शक्तितः॥ दक्षिणा राजशार्दूल वरुणं संस्मरं स्ततः। कृत्वा तु यज्ञपात्राय ज्ञोपकरणानि च॥

सत्त्विग्भ्यस्तु समं दत्वा मंडपं विभजेत्पुनः॥ भोजयेत्तु यथाशक्ति पंचशद्वाथ विंशतिः॥ हेमपात्रीं च

शय्यां च स्थापकाय निवेदयेत्॥ ततः सहस्रं विप्राणां अथवा षट्शतं तथा। एवमेव पुराणेषु तडाग

विधिरुच्यते॥ कूपवापीषु सर्वासु तथा पुष्करणीषु च॥ एवमेव विधिर्दृष्टः प्रतिष्ठासु तथैव च॥ स

र्वासु वर्त्तुलचतुरस्रादिषु॥ मंत्रं तु विशेषः स्यात्प्रासादोद्यानभूमिषु॥ प्रासादो वास्तुपुरुषः उद्या

ने वनस्पति दैवताः। तन्मंत्रतो विशेषस्तत्र धेः। एतच्छक्त्या वर्द्धनविधि [illegible] स्वयंभुवा॥ अ

र्द्धमासिकं च विश्रुते॥ तत्र होतृजापक द्वारपालानां चतुष्टेतु [illegible] गुरुश्चेति त्रयोदशोत्यर्थः। होमा

ध्वे का द्दिदक्षिणामप्यर्द्धमिति केचित्। स्वल्पं त्रिकार्य्यं वित्तशाठ्यादृते न भिः। प्रावृट्कालस्थितं तोयमग्नि

ष्टोमसमं स्मृतं॥ शरत्कालस्थितं यस्यात्तदुक्थ्यफलदायकं॥ वाजपेयातिरात्राभ्यां हेमंतशिशिरे स्थितं॥

[illegible]

ज० उ०
॥ ६॥

अश्वमेधसमं ज्ञा कुर्वन्ती समये स्थितं॥ ग्रीष्मे पियास्थितं तोयं राजसूयादि शिष्यते॥ एतान्महारा
जविशेषधर्मान्करोति यथोनघ शुद्धबुद्धिः। सयाति रुद्रालयमाशु पूतः कल्पाननेकान्दिवि
मोदते च॥ अनेकलोकान्समहस्तदीपान्भुक्त्वाप रार्द्धद्वयमंगनाभिः॥ सहैव विष्णोः परमं पदं य
त्प्रयाति तद्योगबलेन भूयः॥ ॥ इति जलाशयोत्सर्गविधिः॥ ॥ अथ जलाशयोत्सर्गप्रयोगः॥
अधिवासनदिन पूर्वदिने कृत हविष्यभोजनोधिवासदिने पूर्वाह्णे कालादिसंकीर्त्य सकलपापक्ष
यपूर्वक रुद्रालयागमनानंतर बहुकल्पकालावधिक द्युलोकभोगपूर्वक परार्द्धकालावच्छि
न्नमहस्तापः प्रभृति लोकांगनासहित तल्लोकागतभोगोत्तर वैष्णवपरमपद प्राप्तिकामः श्वो
ऽमुकजलाशयोत्सर्गं करिष्य इति संकल्प्य॥ ॥ गणेशपूजा स्वस्तिवाचन मातृवसोर्द्धारापूजा वृद्धि
श्राद्धं कुर्वेत्विग्वरणानि सामान्यप्रयोगोक्त रीत्या कुर्यात्॥ तत्रर्त्विजश्चतुर्विंशतिः॥ अष्टौ होतारः॥
अष्टौ जापकाः। अष्टौ द्वारपाल इति। चत्वारश्चत्वारो वा एते गुरुश्चेति त्रयोदश वा। अलाभे कोवे ॥ ६

कोणगुरुरेव वा॥ ततस्तान्मधुपर्ककरकुंडलाभि।गावस्त्रादिनार्चयेत्॥ द्विगुणमूर्ध्यं करक
कुंडलादिगुरवे देयं। ततो मंडपप्रवेशावास्तुपूजा मंडपपूजाग्निस्थापनोत्तरं गुरुर्वारुणमं
डलं मध्यस्थपद्मे ग्रहान्यजेत्॥ तत्र कर्णिकायां वृत्ते मंडले सूर्यं। आग्नेयपत्रे चतुरस्रे सोमं। दक्षि
णपत्रे त्र्यस्रे भौमं। ईशानपत्रे बाणाकारे बुधं। उत्तरे दीर्घचतुरस्रे गुरुं। पूर्वे पंचकोणे शुक्रं। पश्चिमे
धनुषि शनिं॥ नैरृत्ये शूर्पाकारे राहुं। वायव्ये ध्वजाकारे केतुमिति। ततस्तत्रैरधिदेवताप्रत्यधि
देवताविनायकादीन्यैवावाहयेत्। तन्मंत्रास्तु सामान्यप्रयोगेनुसंधेयाः। ततो मंडलपूर्वादिदि
कू शेषु इंद्रादीनामावाहयेत्॥ तद्यथा। त्रातारमिंद्र ह्येहि सर्वामरसिद्धसंघैरभिष्टुतो वज्रधरामं
रेशः संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते॥ ॐ इंद्रेहेह तिष्ठ स्वाहा। गजस्कं
धसमारूढं वज्रहस्तं महाबलं॥ आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति पूजयेत्। एव
माग्नेयकलशे। अग्नि दूतं एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोऽभिजुष्ट॥ तेजोवता लोक
गणेन सार्द्धं मखहा एमूजां भगवन्नमस्ते। अग्नेइहागच्छेह तिष्ठेति अग्निमावाह्य। शक्तिहस्तं ज्वलद्रूपं

अ॰ उ॰
॥७॥
7

ह्यागरूढ हस्त विमुंचे ॐ॥ आ॰वा॰ यामिति पूजयेत्॥ याम्यकुंभे यमाय सोम एह्येहि वैवस्वत धर्मराज
सर्वामरैरर्चित धर्ममूर्ते। शुभाशुभानंद शुचामधीश शिवाय नमः पाहि मखं नमस्ते। ॐ यमे
हागच्छेह तिष्ठ स्वाहा। महामहिषमारूढं दंडहस्तं महाबलं। आ॰वा॰ मिति पूजयेत्। नैरृत्यकुं
भे मोषूणः परापरा एह्येहि रक्षोगणनायकस्त्वं विशाल वेताल पिशाच संघैः॥ ममाध्वरं पाहि
शुभाधिनाथ लोकेश्वर त्वं भगवन्नमस्ते॥ निरृते इहागच्छेह तिष्ठेति आ॰वा॰ तीक्ष्णदंष्ट्रं श
वारूढं खड्गहस्तं महाबलं॥ आवाह्य॰ मिति पूजयेत्। पश्चिमकलशे तत्त्वायामि एह्येहि पादोग
ण वारिधीश गणेन पर्जन्य सहाप्सरोभिः॥ विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्न
मस्ते। वरुणेहागेह तिष्ठ स्वाहा। मकरस्थं महाबाहुं देवदेवमपांपतिं। आवा॰ पूजयेत्। वायव्य
कलशे तव वायवे तस्य ते एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः॥ प्राणाधिपः धि ४
कालकवे सहाय गृहाण पूजां भगवन्नमस्ते॥ वायो इहागच्छेह तिष्ठ स्वाहा॰ मृगस्कंधस
मारूढं ध्वजहस्तं महाबलं॥ आवा॰ ना मिति पूजयेत्॥ उत्तरकुंभे आप्यायस्व एह्येहि यज्ञेश्वर य राम
ज्ञरक्षां विधत्स्व नक्षत्र गणेन सार्द्धं। सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते॥ ॥७॥

सोमेहागच्छेहतिष्ठेत्यावाह्य। दशाश्वरथमारूढं गदाहस्तीमहाबलः। आवा० तान्नितिरञ्जयेत्। ऐशा
न्यकुंभे तमीशानं एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगगण नसाईं॥ लोकेश[illegible]ेश्वर यज्ञ
सिद्ध्योग्रहाण पूजां भगवन्नमस्ते॥ इशानेहागच्छेहतिष्ठेत्यावाह्य। वृषस्कंधसमारूढं शूलहस्तं त्रि
लोचनं॥ आवाह्य० पूजयेत्। निर्ऋतिवरुणयोर्मध्यकुंभे आर्यजोः शक्ति एह्येहि पाताल धरामरेंअ
नागांगनाकिंनरगीयमाना रक्षोरगेन्द्रामरलोकसंघैरनंतरक्षा धरमस्मदीयं॥ अनंतेहागच्छेह
तिष्ठेत्यावाह्य। निःशेषजगदाधर शेषसुरगणार्चित। आवा० पूजयेत्॥ इंद्रेशानमध्ये कुंभे ब्रह्म
ज्ञानं। एह्येहि सर्वाधिपते सुरेंद्र लोकेन साईं पितृदेवताभिः। सर्वस्य धातास्यमितप्रभावो रक्षा
ध्वरं नः सततं नमस्ते॥ ब्रह्मन्निहागच्छेहतिष्ठेत्यावाह्य। श्वेतहंससमारूढं पद्मयोनिं प्रजापतिं॥ जगद्गुरुं
आवा० पूजयेत्॥ अनंतब्रह्मणोः कलशाभावपक्षे अधऊर्द्ध्वदेशयोरावाहनं। ततो मंडलमध्ये पंचवर
न्नै सौवर्णं कूर्मं मकरं राजतं मत्स्यं दुंदुभं ताम्रं कुलीरं मंडूकं लोहं। शिशुमारयुतां सुवर्णपात्रीं निर्म
ल्य वरुणेति मंत्रेण स्थापयित्वा ब्रह्माणं शिवं विष्णुं। गणपतिं श्रियं। अंबिकां। भूतग्रामं वा तत्तन्मंत्रैरा
वाह्य पूजयेत्। अत्रैंद्रादि पूजा समयपौराणिकामंत्राः। इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः॥

ग्र०ज० शक्तिहस्तो महावीर्यस्तस्मै नित्यं नमो नमः॥ सर्वतेजोधिपो देवो रक्तवर्णो महाबलः॥ शक्तिहस्तो महावीर्यो वैश्वानर नमोस्तु ते॥ दंडहस्तः कृष्णवर्णो धर्माध्यक्षो महाबलः॥ प्रेताधिपतये तुभ्यं यमराजाय ते नमः॥
॥८॥ सर्वरक्षोधिपो देवो निर्ऋतिर्नीलविग्रहः॥ महाखड्गधरो देवस्तस्मै नित्यं नमो नमः॥ नागपाशधरो नित्यं मकरस्थो दिवाकरः॥ निमग्नः शुक्लवर्णश्च नमोस्तु वरुणाय ते॥ सर्वप्राणाधिपो नित्यं सर्वव्यापी तु सुस्थितः॥ ध्वजहस्तो मेघवर्णस्तस्मै नित्यं नमो नमः॥ सर्वनक्षत्रमध्येयः सोमो राजा व्यवस्थितः॥ शुक्लवर्णो गदाहस्तस्तस्मै नित्यं नमो नमः॥ सर्वदेवाधिपो देव ईशानः शुक्लविग्रहः॥ शूलपाणिर्वृषारूढो रुद्राधिपतये नमः॥ यन्नागाधिपतिर्देवो योनन्तो नीलविग्रहः॥ पातालवसतिर्नित्यं चानन्ताय नमो नमः॥ पद्माशकुसुमाकारो ब्रह्मा सर्वार्थसाधकः॥ सर्वलोकपतिश्रेष्ठस्तस्मै नित्यं नमो नमः॥ ॥इति॥ ॥सूर्यादिग्रहेभ्यो नमः इत्यादिप्रयोगतो बलीन्दद्यात्॥
तत्रामांतपीठाश देवताभ्यो तत्तन्मंत्रोते सूर्याय गुडोदनो बलिर्नमः इत्यादिप्रयोगतो बलीन्दद्यात्॥ सोमाय घृतपायसं॥ भौमाय मसूरान्नं। बुधाय क्षीरोदनं। बृहस्पतये दध्योदनं। शुक्राय घृतान्नं॥ शनये तिलशरान्नं॥ राहवे मांसोदनं। केतवे चित्रोदनं। अधिदेवताप्रत्यधिदेवताविनायकादिपीठस्थ्यः पायसबलिः॥ इन्द्रादीनां दशानां माषोदनबलिः॥ ततश्चाचार्यः पूर्वकुंडात्सर्वतः पदत्रयस्थलं त्यक्त्वा हरिद्रानेनाभ्यां रूपमभ्यज्य तीर्थोदकेन स्नापयित्वा गोरशर्षपगोरोचनागुग्गुलुदूर्वानिबपत्रगर्भांपोट राम ॥८॥

लिकं। यदाबध्नं दाक्षायणा इति मन्त्रेण बध्वा युवा सुवासा इति वस्त्रेणावेष्ट्य यूपस्य तीयांशेनावटं खनित्वा तन्त्रा दीतादिक प्रक्षिप्य तत्र ध्रुवासीति मन्त्रेण यूपं निक्षिपेत्। ततः प्रति कुण्डं समीपे ईशान्यां कलशस्थापनं कृत्वा तत्र सर्वे समुद्रा इति तीर्थानि न्यस्य वरुणं पूजयेत्पुनः। ततः आचार्य सचिव ऊष्वस्वेस्वे कुण्डे स्वगृह्योक्त विधिनाग्निप्रणयनानन्तरं भविकर्म कुर्युः॥ तत्र प्रति कुण्डमाचार्य कुण्डमन्तिकुण्ड दक्षिणे तोयजमानउपविश्य जलमादायास्मिन्कर्मणि दहवि सूर्यसोमभौमबुधगुरुभृगुकशनि राहु केतु ग्रहेभ्यः ईश्वरो भास्कर द विष्णु ब्रह्म इ यम काल चित्रगुप्ताः देवताभ्यो अग्न्यप्सु ति विष्णुरिंद्राणा सर्पेः प्रजापति ब्रह्म प्रत्यधिदेवताभ्यो। विनायक दुर्गा वायु आकाशाश्विपंचलोकपालेभ्यः इन्द्राग्नि यम निर्ऋति वरुण वायु सोमेशानानन्त ब्रह्मादि क्पा। लेभ्यो ब्रह्म विष्णु गणपति श्री शिव (शिव) विकाम तन्त्राम विश्वकर्मन वरुणाग्नि वायु सूर्य प्रजापति स्विष्टकृदादि पूर्वोत्तरांग देवताभ्यो नममनेति त्यजेत्॥ ऊपके द्वारपालेभ्य शांति उपादोक्त यमाणे होमः कार्यः। अत्र द्वारपाल ऊप्यमन्त्रा ऊयते। श्रीसूक्तं पावमान व सोमसूक्तं सुमंगलं॥ शां त्या ध्यायं वं ऊसूक्तं रक्षोघ्न वेति बह्वृचौ॥ श्रीसूक्तं हिरण्यवर्णां हरिणीमित्यादि पंचदशर्चं। पावमानस्वादिष्ठयेत्यादि। सोमसू

प०उ० ॥६॥ क्तं त्वं सोम प्रचिकित इत्यादि जविष्ठावित्यत त्र्ययोविंशत्यर्कं सुमंगलं कनिक्रद दित्यादि। शांतिकाध्याय शान्न इन्द्राग्नी इत्यादिकः। इंद्र सूक्तं यो जात एवेत्यादिकं। रक्षोघ्नं कृणुष्व पाज इत्यादि। दक्षिणे द्वारपालौ तु रुद्रान् पुरुषसूक्तकौ॥ श्लोकाध्याय शुक्रियं वामदेव्यं ध्यायेमे वच। रुद्रान्नमस्ते इत्यादि मंत्रान्। [redacted]। श्लोकाध्यायं देवसवितः प्रसुव यज्ञे इत्यादि च। [redacted]। शुक्रियं श्ववं वावं प्रपद्ये इत्यादिकं। मंडलाध्यायमादित्यो वा एष तन्मंडलं तपतीति तैत्तिरीये प्रसिद्धं। वामदेव्यं बृहत्साम ज्येष्ठ साम रथंतरं। तथा पुरुषसूक्तं च रुद्रसूक्तमतः परं। आज्य दोहानि सामानि शांतिकाध्याय मे वच॥ भारुण्डानि च सामानि पश्चिमे द्वारपालकौ॥ वामदेव्यं कया नश्चित्र मित्यस्य।
त्र विगीतौ बृहत्साम त्वामिद्धि हवामह इत्यस्य। ज्येष्ठ साम मूर्धानं दिव इत्यस्य। रथंतरमभि त्वा शूर नोनुम इत्यस्य। पुरुषसूक्तं सहस्र शीर्षेत्यादिकं। रुद्रसूक्तमा वो राजा न मिति वर्ग द्वयं। आज्यदोहानि देवव्रतानीत्यादि। शांतिकाध्यायः अबोध्यग्निरित्यादि। भारुण्ड सामानि इमं स्तोमम्
इत्याद्य सुगीतानि। अथर्वांगिरसनील रुद्रं चैवापराजितं। देवीं च मधुसूक्तं च रोधसं शांतिकाध्याय। अथ ॥राम
र्वाणौ द्वारपालौ पठेतामुत्तराश्रितौ। अथर्वण सूक्तं ब्रह्म गाय बृहद्गाये इत्यादि। आंगिरसमांगिरसो जज्ञानी ॥६॥

त्यादि। नीलरुद्रं या रुद्र पत्न्या वित्यादि। अपराजिता देवी परिवत्सनीत्यादि। मधुसूक्तं मधुवाता ऋतायत
इत्यादि। अभयं सा वाघ्रधि वीत्यादि। शांतिकाध्यायः। शन्न इंद्राग्नी भवतामवोभिरित्यादि। जापकोतु रा
त्रिसूक्तं रौद्रं च पावमानं सुमंगलं। पौरुषं तु ब्रेष दानां जपेतां बहुधा पृथक्। रात्रिसूक्तं रात्रिं व्यख्य
दायतीत्येवी रौद्र मित्तां रुद्राय तवसे कपर्दिन इत्यादि। शाक्तं रौद्रं च सौम्यं च कौष्मांडं जातवेदसं।
सौरं चेति जपेतां हो दाक्षिणे न यजुर्विदौ॥ शाक्तमिदं वा विश्वतश्चक्षुरुतेत्यादित्यनुवाकं। रौद्रमि स्वरि
मा रुद्राय स्थिरधन्वने गिर इत्यादि षड्ऋचं। सौमं सोमो धेनुरित्यादि षडृचं। कौष्मांडं यद्देवा देवहे
डनं देवासश्चकृमेत्यनुवाकचतुष्टयं। जातवेदसं यस्त्वा हृदा कीरिणेत्यादिमनुवाकं। सौरं सूर्यो
देवीमुषसं रोचमानेत्यादि षडृचं। वैराजं पौरुषं सूक्तं सौवर्णं रुद्रसंहितां। शैशवं पंचनिधनं गा
यत्रं ज्येष्ठसामकं॥ वामदेव्यं बृहत्सौम्यं रौरवं सरथंतरं। गवांव्रतं विकर्णं च रक्षोघ्नं च यशस्तथा॥
गायेयुः सामगा राजन्पश्चिमद्वारमाश्रिताः॥ वैराजं पिबा सोममिंद्र मदंतु त्वेत्यादि। सौवर्णमुद्ये
दग्निः शुक्रं तामह्यमित्यृचत्रीणि सामानि रुद्रसंहिता आ वो राजानमित्यादि। शैशवं उच्चा ते जातमं
धस इत्यस्यां गीतं। पंचनिधनं रस्यां गीतं। गायत्रं तत्सवितुरित्यस्यां गीतं। ज्येष्ठसाम मूर्द्धानं दिव इति प्रसिद्धं।

ज० तु० वामदेव्यं कयानश्चित्र इत्यस्यां गीतं। बृहत्साम त्वामिद्धि हवामह इत्यादिप्रसिद्धं। सौम्यसाम व्रतं सीतेप
॥२०॥ यो सीति। रौरवं पुनर्मामित्यत्र प्रसिद्धं। रथंतरं अभि त्वा शूर नोनुम इत्यस्यां गीतं। गवीं व्रतं तेम त्वं तत्र प्रथ
मं अग्निमीळे इत्येतस्यां गीतं। विकर्णं विभ्राडित्यस्यां गीतं। रक्षोघ्नं अग्ने रक्षाण अग्नेयु क्ष्वाहि इत्येतस्यो
गीतं। यशः बृहद्दिद्धा येत्यत्र गीतं जपेत् नामप्यथर्वाणं शांतिकं पौष्टिकं तथा॥ अंते वरुणसूक्तं चउ
पेयुः सर्वेष्वहि। शांतिकं पौष्टिकं प्रसिद्धं वाथर्वणानां॥ वरुणसूक्तं स्वस्वशाखीयं। तत्र स
ग्वेदीनां मोषुवरुण इति पंचानां वसिष्ठो वरुणो गायत्र्यंता जगती वरुणप्रीतये जपे विनियोगः
मोषु वरुण० रीति च॥ यजुर्वेदीनां। इमं मे वरुण इति द्वयोः शुनःशेपो वरुणो गायत्री त्रिष्टुभौ
वरुणप्रीतये जपे०॥ सामगानां। इमं मे पुष्कलो वरुणो गायत्री वरुणः। अथर्वणानां। उदुत्तमं
ब्रह्मा त्रिष्टुप् वरुणप्री०। प्राच्यादिकुंडेषु ऋग्वेदिप्रभृतयो होतारः प्रधानहोमात् प्राचीनं कर्म
स्वस्वगृह्यानुसारि कृत्वा प्रधानहोमं कुर्युः। तत्र ऋग्वेदिनां बलात् आज्यभागानंतरं वारुणैर्मंत्रैर
ष्टोत्तरशतमाज्याहुतिस्तावतीरेवौदुंबरसमिदाहुतिश्च जुहुयात्॥ मंत्रास्तु। तत्त्वा यामि ब्रह्मणा राम
तदित्यृक्। तदिद्वा शुनःशेपो ह्यह्वत्। अव ते हेळो०। उदुत्तमं वरुण। त्वन्नो अग्ने वरुण० सत्वन्नो ॥२१॥

अग्नेऽइमं मे वरुणश्रुधीः। अत्राख्यानां चतुर्णां चतुर्दशावारं। अस्यां त्रयोदशावारमावृत्य अष्टोत्तर
शतसंख्या भवति। सांप्रदायिकाः ग्रह अधिदेवता प्रत्यधिदेवता विनायक पंचेंद्र शिव मरुद्दिग्रादि
१६श ब्रह्मानंत लोकपाल विश्वकर्मभ्यः प्रत्येकमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिरष्टौ वान्यतमसंख्यया
जुहुयात्। ग्रहेभ्योधिदेवतादीनां न्यूनसंख्यया होम इति संप्रदायः। तत्र ग्रहेभ्यस्तत्तत्समिधोन्ये
षां पालाश्यः। आज्यं च सर्वेभ्यः पृथक्। एतन्मंत्रास्तु सामान्यप्रयोगोक्तक्रमेण। इंद्र शिव मरुतां तु
त्रातारमिंद्रं गर्ग इंद्र त्रिष्टुप् ए० कद्रुद्राय घोरः काण्वः शिवो गायत्री। मरुतां यस्य राहुगणो मरु
तो गायत्रीति मंत्राः। केचित्तु ब्रह्म शिव विष्णु गणपति श्री अंबिका भूतग्रामाणामपि तत्तन्मंत्रैर्होम
माहुतिः। तत्र श्रियो मंत्रं गंधद्वारां। अंबिकायाः अंबे अंबिके इति प्राजुषः। भूतग्रामस्य नाममं
त्र एव। ततः स्विष्टकृदाद्युत्तराङ्गाहुतयः। अयं च सर्वोपि वरुणग्रहादिहोमो दिनचतुष्टये प्रत्यहमा
वर्तनीयः। स्विष्टकृदाद्युत्तराङ्गहोमस्तु चतुर्थदिन एव कार्यः इति केचित्। पूर्णाहुतिस्तु चतुर्थदिन
एव। यजुः सामाथर्ववेदिनामप्ययमेव होमक्रमः। मंत्रास्तु तेषामपि सामान्यप्रयोग एवोक्ताः। वरुण
मंत्रास्तु यजुर्वेदिनां तावत् इमं मे त्यस्य शुनःशेपो गायत्री वरुणः वरुणप्रीतये आज्यहोमे विनियोगः॥ सर्वत ना नाममिति

१ उदुत्तममिद्धोमेच

ज०उ० भुनस्त्रिष्टुप्वरुणः। त्वं नः सत्वन्नइत्यनयो र्वामदेवस्त्रिष्टुप्। २४॥ अग्निवरुणौ देवते। अयाश्चाग्ने
॥११॥ सीति प्रजापतिः पङ्क्तिरग्निः। येते शतमिति शुनःशेपस्त्रिष्टुप्वरुणः। ६॥ अदित्यास्त्वकृष्णाजिन
स्त्रिष्टुप्वरुणः। ७॥ वनेषु वीति कृष्णाजिनस्त्रिष्टुप्वरुणः। उदुत्तमं शुनःशेपस्त्रिष्टुप्वरुणः। ८॥
वरुणस्योत्तंभनमभितपनो जगती वरुः। निषसाद दिप्रजापतिर्गायत्री वरुणः। घृतवती
भरद्वाजो जगती वरुणः। ११॥ एतेषां द्वादशमन्त्राणां नवमाराहुत्याष्टोत्तरशतसंख्यासंपत्तिः।
ग्रहादिहोममन्त्रास्तु सामान्यप्रयोगेन्द्रोक्ताः। ततो व्याहृतिहोमादीन्युत्तरांगानि। सामग्रेपि व्या
हृति [redacted] होमां तानि पूर्वांगानि कृत्वा वारुणं होमं कुर्यात्। इमं मे पुष्करो गायि वरुणः। वरु
णप्रीतये आज्यहोममुदुंबरसमिद्धहोमे विनियोगः। एवमुत्तरचोद्देशत्यागो। उदुत्तमं गोतमस्त्रि
ष्टुप्वरुः। घृतवती भरद्वाजो जगती वरुणः। एतेषां मन्त्राणां त्रयाणां षड्विंशद्वारमाहुत्याष्टोत्तरशतसं
संपत्तिः। ग्रहादिहोममन्त्रास्तु सामान्यप्रयोग एवोक्ताः। अतउत्तरहोमान्तं ज्ञात्वा र्वणो पि समंत्रक तत्रबर्हि
दानग्रहणप्रभृत्यभ्यातानहोमांतं कृत्वा वारुणं होमं कुर्यात्। अप्सुरा जन्नित्यथर्वा एतेषां वरुणं
मन्त्राणां सप्तविंशतिवारया हुत्याष्टोत्तरशतसंख्यासंपत्तिः। ग्रहहोममन्त्रास्तु सामान्यप्रयोगएवोक्ताः। राम
अनुष्टुप्वरुणः। धाम्नोधाम्नराजन्नित्यथर्वा पङ्क्ति वरुणः। उदुत्तममथर्वा त्रिष्टुप्वरुणः। ३॥ अस्मत्प्रराम ॥११॥

धर्वो त्रिष्टुप्छन्दः। ततः पुनरप्यातानहोमाद्युत्तरतंत्रं कुर्यात्। आचार्योऽपि स्वकुंडे स्वशाखोक्तविधि-
नामैवैताभ्यो देवताभ्यो जुहुयात्। एवं रात्रावधिवासनं निर्वर्त्याचार्यः कुंडाभ्यां स्थापितकल-
शेषु गजस्थानाऽश्वस्थानाद्रथ्यावल्मीकसरित्संगमाद्ध्रदगोकुलचत्वरसंबंधिनीरष्टौ मृदोऽश्वत्था-
दिवृक्षोद्भवान्पंच पल्लवान्कुंकुमकर्पूरकस्तूरिकाः शर्षपांच प्रक्षिपेत्। तैश्चोदकैर्यजमानं प्राङ्मु-
खं सर्वौषध्यम्लानलिप्तं पुत्रपत्नीसहितमृत्विज उदङ्मुखाः सूर्योदयात्त्र एषसि पल्लवैरभिषिंचे-
युः स्नापयेयुश्च। मंत्रास्तु तत्तच्छाखीयाः। पौराणाश्च। सुरास्त्वामभिषिंचंत्वित्या सामान्यप्रयोगे उक्ताः।
ततो यजमानः शुक्लवेषः प्राङ्मुख उदङ्मुखेभ्यो गुर्वृत्विग्भ्यो यथाशक्ति दक्षिणां दद्यात्। मं ओं हूँ हिरी-
शान्यां दद्यादिति रूपनारायणीये। मं उपमध्ये एवेति मदनरत्नादयः। अत्रप्रयोगः। कुशतिलय-
वजलान्यादायाद्येत्यादि कर्त्तव्यामुकजलाशयोत्सर्गांगभूतकृते तदधिवासनप्रतिष्ठार्थं रुद्रदैवताः
शतं गाः कृष्णषष्टिं वापि च शतं वा षट्त्रिंशतं वा पंचविंशतिं वा युष्मभ्यं संप्रददे न ममेति दद्यात्। हस्तास्ते-
वरणक्रमेण दद्यात्। ते च स्वस्तीत्युक्त्वा कर्मस्कृतीपठेयुः। ततः कर्मांगदेवताः प्रीयंतामिति यजमानेनो-
क्तेऽनुज्ञाता भवंत्विति वदेयुः। ततो यजमानः सुलग्ने तुलाशये जलेऽनेकानकभृंगादिभूषितां गां यथा-

ज० कु०

॥१२॥ शान्तिसंसृज्यैरावतीधेनुमतीहिभूयांसमितिमंत्रेणावतारयेत्। तारंतीतामनुमंत्रयेत्तत्रमंत्रः। इदंस
लिलंपवित्रंकुरुध्वंशुद्धाः पूताम्ताः सन्तुनित्यं। नां तारयंति सर्वातीर्थाभिषेकंलोकाङ्क्षोकन्तर
तेतीर्थंतद्गति। वापीकूपे स्वर्गेतु गां त्रिरुपरिभ्रामयेद्दितिरूपनारायणीयादेः॥ ततोऽजपमा
नोगुरुणावारब्धस्तत्पुच्छे लग्नेजलेगच्छेत्रेवमंत्रद्वयंपठेत्। नद्यांस्समुद्रात् दुर्गमिमंधुनेति
मी यिवारोचनेविवेदे इति पठेत्। ततंजलएवशान्त्यानुत्तराभिमुखः गोः पुच्छंगृहीत्वा जलेऽसिद्ध
दि त्वाऽजपमानोगुरुणान्वितोयवकुशाभिर्देवमनुष्यपितॄन् तर्पयेत्स्वशाखया कुर्यात्। अत्रान्या
नपितर्पणेश्लोकान्केचित्पठंतीति तेऽत्रनिर्मूलत्वान्नलिखिताः। ततः पुच्छलग्नएवेशान्यांमु
त्तरेतत्रमंत्रः। आपो अस्मान्मातरः सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतस्याम। अद्धि
तृणमघ्न्ये विश्वदानीं पिबशुद्धमुदकमाचरंतीति तामु [redacted] ॥ यदिहि कुर्यात्तदाहीकूएव
तीवस्त्रपत्नीवस्त्रनांवत्समभिरूढंतीमनसाभ्यागात्। दुहामश्विभ्यांपयोअघ्न्येयं सावर्द्धतांमहते
सौभगायेत्यनुमंत्रयेत्। ततः कृतवस्त्रपरिधानोयजमानस्तांसंसृज्य सालंगायविप्रप्रति राम
पादयेत्। प्रतिपत्तिलादेवताश्चदाक्षिणा। ततः कुंकुमाक्तेनत्रिवृतासूत्रेण जलाशयंवेष्टयित्वा

स्थापयेत् ॥१२॥

तत्समीपे उपविशेत्ता गुरुस्तत्प्रागासादितकूर्ममकरादियुतां हेमपात्रीं पंचरत्नयुतां दध्य
क्षतमहानदीजलयुतामादायोदङ्मुखेश्चतुर्भिर्ऋत्विग्भिः स्वयं प्राङ्मुखः स्थित्वा गाथेजज्ञे
सौवर्णौ कूर्ममकरौ प्रागाग्नेयभागयोः प्रत्यङ्मुखौ राजतौ मत्स्यडुण्डुभौ। दक्षिणनैरृतभागयोः उद
ङ्मुखौ ताम्रौ कुलीरमण्डूकौ पश्चिमवायव्ययोः प्राङ्मुखौ आयसौ शिशुमारं उत्तरतो दक्षिणा
भिमुखं वारुणैर्मन्त्रैः प्रक्षिपेत्। ततः शन्नो देवीरित्यस्यां गीतेनाथर्वणसाम्ना पुनर्मामैत्विन्द्रि
यं पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मेत्यरण्यगानसाम्ना पो हि ष्ठेति तिसृ
भिर्नवोदङ्मुखस्तां पात्रीं न्युब्जीकुर्यात्। ततः स ऋत्विग्गुरुराचामेत्। ततो यजमानः प्राङ्मु
खजलोत्सर्गं कुर्यात्। तत्र कुशयवजलतिलानादाय देशकालसंकीर्तनान्ते पापक्षयपूर्व
करुद्रालयगमनानन्तरं बहुकल्पकालावधिकयुलोकभोगानुभवपूर्वकपरार्द्धद्वयकालाव
च्छिन्नमहस्तपःप्रभृतिलोकगमनाहितत्तल्लोकभोगोत्तरकालसद्योगबलप्राप्यवैष्णवपरम
पदप्राप्तिकामोहमिमं तडागादिजलाश्रयं वरुणदेवताकं स्नानपानावगाहनार्थं सर्व

रा० उ०

13

भूतेभ्य उत्सृजेदित्युक्त्वा जलाशयं निरीक्ष्य जलं भूमौ निक्षिपेत्॥ ततो मंत्रद्वयं जपेत्॥ सर्वभूतेभ्य उ
त्सृष्टं मयैतज्जलमुत्तमं॥ रमंतु सर्वभूतानि स्नानपानावगाहनैः॥ सामान्यं सर्वभूतेभ्यो मया दत्तमि
दं जलं॥ रमंतु सर्वभूतानि स्नानपानावगाहनैरिति॥ ततो गुरुर्मंडपस्य प्रागादिदिक्षु इंद्रादिभ्यः सर्वेभ्यो
बभक्तबलिं दद्यात्॥ अथाचारप्राप्तं नागयष्ट्यारोपणं॥ तत्र गुरुरष्टसु भूर्जपत्रेष्वनंतवासुकितक्षक
कर्कोटकपद्मशंखमहापद्मकुलिकानां नामानि प्रत्येकं लिखित्वा वक्ष्यापितस्य जलकलशे प्रक्षिप्य
संयोज्य तत्र वरुणं पूजयित्वा एकं भूर्जपत्रमाकृष्य तत्र लिखितनाम्ना नागं तीर्थजपालाप्लुतायां य
मुकनागेहागच्छेत्यावाह्य स्थापयित्वा x यज्ञियद्रदोद्भवायां जलाशयात्पत्त्वा घृतसारतो द्वादशपर्वद्दशवि
शत्यन्यतमारत्निमितायां यष्ट्यां x नेन नाम्ना नागेनास्य जलाशयस्य रक्षा कार्येति जलेभ्यः श्रावयित्वा तन्नागं
यष्ट्यावमुकनागाय नमः इति नाममंत्रेण यथाशक्ति पूजयेत्। यष्टिसंबंधिवर्तुलमस्तकोपरि शूलं लोह
मयं चक्रमारोपयंति। ततो जलमध्ये प्रागेव यष्ट्यर्थं कृतखातसमीपे चितायां यष्टिं नयेत्॥ ततः खाते दधिमधु
घृतकुशतीर्थजपंचरत्नानि प्रक्षिप्य अक्वासीति मंत्रेण यष्टिं समारोपयेत्। पुनः द्यौः शांतिरिति पठेत्। इद राम
यष्ट्यारोपणं कूपवाप्यादीनां कार्यमिति रूपनारायणीये। ततो यं मानो गंगादितीर्थजलं जलाशये प्रक्षिप १२
ज१

त्राऊं स्वउपविश्य पठेत्। कुरुक्षेत्रं गया गंगा प्रभासः पुष्कराणि च॥ एतानि पंच तीर्थानि तडागे निवसंतु
मे॥ वितस्ता कौशिकी सिंधुः सरयूश्च सरस्वती॥ एतानि पंच तीर्थानि० दशार्णमुरलासिंधुरथावर्त्ता दृषद्वती॥ ए
तानि पंच० यमुना नर्मदा रेवा चंद्रभागा च वेदिका॥ एतानि० गोमती वाङ्मती शोणो गंडकी सागरस्तथा॥ एतानि०
इति पठित्वा जलं स्पृष्ट्वा आपो हिष्ठेति तृचं सवं जपन्न विछिन्न दुग्धधारया जलाशयं त्रिः प्रदक्षिणी कुर्यात्॥
ततः एकब्राह्मणं यथेष्टं दुग्धं पाययेत्। ततो गुरुर्दिनत्रयं स्थापितदेवतानां पूजनं कृत्वा सात्विग्भिः सह स्वे
स्वे कुंडे वारुणप्रभृति विश्वकर्मांत होमं कुर्यात्॥ तदंते तत्तंत्रांगं निवर्त्य स्वस्वकुंडेषु सर्वे पूर्णाहुतिं कु
र्युः। असंभवे त्वधिवासनदिवस एव पूर्णाहुतिरिति वदंति॥ ततो वह्निपूजनं। आयुष करणादि कर्मशेषं यथा
यथं कुर्युः। दरिद्रो यजमानः एकाग्निविधानेन गुरुणैव सर्वं कारयेदिति मदनादयः॥ ॥ अथ चतुर्थी कर्म॥ ॥
तत्र गुरुः स्थंडिलं यद्देवा देवहेडनमिति दर्भैः परिसमुह्य। मानस्तोक इत्युपलिप्य। त्वां स्त्रेष्विंदु सप्तर्तिं
इत्युल्लिख्य। सदसस्पतिरित्युद्धृत्य। त्वामिद्धि हवामहे इत्यभ्युक्ष्य। अग्निर्मूर्द्धेति वरुणमग्निं प्रतिष्ठापयेत्॥
हिरण्यगर्भ इति दक्षिणे ब्रह्मास्तीर्य। ब्रह्म यज्ञानमिति तत्र ब्रह्माणमुपवेश्य। आपो हिष्ठेति कुशोपरि प्रणीतापात्रं सज
लं स्थापयित्वा। आंकलशोष्वितीशान्यां कलशं निधाय तत्र जले वरुणं संपूज्य। कया नश्चित्र इत्यग्निं परिस्तीर्य

अग्नौ

15

गायत्रेणत्वा सादयामीति पात्राणि यथोपयोगमासाद्य॥ विष्णोरराटमसीति पवित्रं छित्वा प्रोक्षणीं प्रणीतोदकं
कृत्वोत्तरय वामहस्ते कृत्वा दक्षिणेनोदिंगनं कृत्वा ऊर्ध्व वस्त्रोद्यासं वरे प्रोक्षणीपात्रं निधाय स्थाल्यामाज्यमासि
च्याइषेत्त्वेत्यधिश्रित्य। ऊर्जेत्वेत्यवेक्ष्य। अग्निं दूतं पुरो दधे इति पर्यग्निं कृत्वा। धातारमिंद्रमिति स्रुवं प्रताप्य। अ
नि। शितोसीति संमार्ग कुशैः संमृज्य। प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः इति पुनः प्रताप्य बर्हिषि निधायोत्ति
ष्ठ ब्रह्मणस्पत इत्या उपमुद्रा स्यसवितुष्ट्व त्युत्तरयोर्जेत्वेत्यवेक्ष्य प्रोक्षणी उत्तरय। यस्यास्ते घोर आसनि। त्यु
पयमन कुशानादाय समिधाग्निमिति तिष्ठन्समिधोन्यादाय॥ विश्वतश्चक्षुरित्यग्निं प्रज्वाल्य तदेवाग्नि
स्तदादित्य इत्यग्निं संसृज्य। देवसवितुरिति प्रोक्षणी उत्तनाग्निं पर्युक्ष्य प्रणीतासु पवित्रं धृत्वा दक्षिणे जा
इंद्राय न्वाच्य जुहुयात्॥ प्रजापतये अग्नये सोमाय भूः भुवः स्वः भूर्भुवः स्वः त्वन्नः स त्वंनः अयाश्चाग्ने ये ते शतं उदु
त्तमं इति स्वाहान्तैर्हुत्वा प्रायश्चित्तं ततः प्रजापतये ति जुहुयात्। ततास्ति स्व भिर्व्याहृतिभिमन सावद्धिर्हु
त्वा इमं मे वरुणेति मन्त्रेण फडं तेन तोयं मभिमंत्र्यतेनाग्निमभ्युक्ष्य गायत्र्या सवित्रे पंचदशाहुतिर्हुत्वा इ
मं मे वरुणेति वरुणाय शतसाज्याहुति जुहुयात्। भूयोपि व्याहृति त्रयेण हुत्वाग्नये स्विष्टते स्वाहेति जुहुयात् राम
। इमं मे वरुणेति पूर्णाहुति होमः। ततोग्नि रजाच्यायुषिकरणं। ततोग्निविसर्जनं। ततो ऋत्विग्भ्यो हिरण्यं १४

दद्यात्। यजमानाभिषेकः। यजमानकर्तृकं पुनः स्रुत्वा महादानं। यांतु देवगणाः इति देवता विसर्ज्ज-
येत्। ततो यज्ञोपकरणादिकमृत्विग्भ्यो हेमपात्रीं वंशयां च गुरवे। मंडपं च सर्वेभ्यो विभज्य दद्यात्। ग्रह-
प्रीत्यर्थं ज्योतिर्विदे पि हिरण्यं दद्यात्। ततो ब्राह्मणान् सहस्रं मष्टोत्तरशतं पंचशतं विंशतिं वा शक्त्यानुरूपं
भोजयित्वा भूयसीं दत्वा। यस्य स्मृत्या॰ प्रमादात्कुर्वतां कर्म त्युक्त्वा त्रिर्विष्णुं स्मरेत्॥ ॥इति तडागोत्सर्ग-
प्रयोगः॥ ॥अथ वापीकूपोत्सर्गः भविष्योत्तरे॥ ॥वापीकूपविधानं च कथयामि तवापरं॥ कुंड मंडपसं-
भारभूषणाच्छादनादिकं॥ तडागविधिवत्कुर्याद्यूपजोतारणादिकं॥ छकालमृत्स्नाकलशान्वापी-
मूलेषु दापयेत्। तीर्थोदकसमायुक्तान् सितचंदनचर्चितान्॥ सितवस्त्रयुगच्छन्नान्समाल्यान्रत्न-
गर्भिणः॥ अर्पयित्वा चरुं तत्र यावमग्नौ यथाविधिः। यावं यवमयी। चतस्रस्त्वाहुतिं हुत्वा भूर्भुवः स्वरिति
क्रमात्। व्यस्तः समस्ताश्चेति चतस्रः। ग्रहहोमं कुर्वीत शांतिपुष्टिविवर्द्धनं॥ वरुणाय बलिं दद्यात् लोक-
पालेभ्य एव च। वारुणानि च सूक्तानि जपेयुर्द्विजपुंगवाः। वेदीमध्ये मंडलं के [illegible] पद्मगर्भं प्रकल्प-
येत्॥ तन्मध्ये पूजयेद्रुद्रं ब्रह्माणं केशवं तथा॥ मत्स्यकच्छपमंडूकान् वेदिमध्ये निवासयेत्॥ नि-
त्रं शं च मिभूतानां धनदो धनकांक्षिणां॥ वैद्यो तो गाभिभूतानां शरणं शरणार्थिनां॥ अतेनेव चर्मणा

वरुणायविसर्जयेत्॥ आदावावाहयेद्देवमनेनैवविशेषतः॥ नमस्तेविश्वगुप्तायनमोविष्णोरपांपते॥ सा

निध्यंकुरुदेवेशासमुद्रादिहएत्यच॥ ततस्तुदक्षिणांदद्याद्ब्राह्मणेभ्योविशेषतः॥ गोःस्थापकायदातव्यानो

ऊनंचानिवारितं। सर्वेषामपिदातव्यंमेषपोषणिकोविधिः॥ अत्रविशेषः॥ प्रतिकुंडकलशस्थापनसमयेच

पौदिषुकुंडेषुवान्यापरिक्षितवस्त्रयुगच्छन्नान्कुतेलक्षणान्कलशान्स्थापयित्वातेषुतीर्थमावाह्यनमस्तेवि

श्वगुप्तायेतितेषुविष्णुमावाह्यपूजयेत्। ततोमहावेद्याषोडशो[illegible]रेयहलोकपालादिस्थापनानंतरंम

ध्येशंखमुद्रब्राह्मणेकेशवंचावाह्यतत्रैवसौवर्णंकूर्मरौप्यमत्स्यंताम्रमयंमंडूकंपंचरत्नतीर्थजलादिषुतार्थ्यंतां

म्रपात्र्यामधिवास्यप्रतिष्ठार्थसंस्पृश्यतडागवद्वलिदानंयूपनिखननंचकुर्यात्पोयथाशाखंचयवमयंचरुंत्रपयि

त्वाज्यभागांतेव्यस्तसमस्ताव्याहृतिभिश्चतस्रआज्याहुतिर्हुत्वा तडागोत्सर्गवद्वारुणमंत्रैर्यववरुदुंबरसमि

दाज्यानांप्रत्येकमष्टोत्तरशतप्रत्येकमाज्याहुतिर्हुत्वाग्रहादिविध्वकर्मांतानांप्रत्येकमष्टाविंशतिंसमिदा

ज्याहुतिर्जुहुयात्। ततोवरुणलोकपालादिभ्योबलीन्दद्यात्। समंतात्कुंभंभ्रामयेत्। इदंसलिलमितिमंत्रपा

ठः। ततःकूर्मादिषुतांताम्रपात्रीमादायमंत्रेणवरुणेतिजलेप्रक्षिपेत्। ततःउत्सर्गः। ब्राह्मणार्थंगांगुरवेद

द्यात्। अन्यत्सर्वंमत्स्यपुराणीयजलोत्सर्गविधिवत्। इदंचावश्यकं। योनकारयतेशौर्तिवापीकूपादिकेवि राम

मां। तस्यतन्निष्फलंतोयंमुक्तंबीजंमिवोखरे। वापीकूपतडागेषुसंस्थितंप्रथमंजलं। अपेयंतद्भवेत्सर्वं ॥१५५

सम१

तच्छूलं स्रुतिकामिति निदावगमात। उत्सृष्टं चञ्जलं त्यक्तं। आग्नेयादिपुरोडाशवत्स्वयं नोपयोज्यमिति के
चित। अत्र सर्वं संशाप्तिनानु सर्गेण दृश्यत्वात्स्वस्यापि तदंतर्गतेर्योगोऽस्तु देवताया एवोद्देश्यत्वात्स्वस्य त
द्भावेन यागवैषम्यात्स्वयमप्युपयोज्यमित्यन्ये॥ एवमारामफलादिष्वपि॥ ॥इति भविष्योत्तरोक्तो वापी
दसर्ग ४ कूपतडागोद्दिष्टिः॥ ॥अथ वापीकूपतडागादिषल्पतोयेषु श्वमार्जारखरवानरसूकरादिमृतका
द्युपघाते सर्वोदकोद्धरणेन शुद्धिः॥ बहुजलेषु कुंभशतमुद्धृत्य पंचगव्यप्रोक्षणं। क्षुद्रप्राणिपाते षष्टि
कुंभोद्धारे पंचगव्यप्रक्षेपः। अल्पतोयोपघाते सूर्यचंद्ररश्मिसंबंधाद्वायुस्पर्शाच्च शुद्धिः। तथा अतिगंभीर
वापीकूपतडागनद्यादिषु चंडालाद्यशुचिस्पर्शे यत्रैव स्थले तत्स्पर्शस्तदेव स्थलं परिवर्ज्यान्यत्र शुद्धिः।
वापीकूपतडागेषु मानुषमृतके क्षिप्ते सर्वजलोद्धाराद्दृष्टशतजलोद्धरणपूर्वकपंचगव्यप्रक्षेपाद्वा
शुद्धिः। वापीकूपतडागजलेषु मनुष्यमरणे तु जलस्याहोरात्रमाशौचं। ततः प्रागुक्तशुद्धिः। एवं मत्रपुरी
षचर्मरुधिरादिपाते प्रक्षेपे त्रिंशत्कुंभजलोद्धार एवैकयामस्त्रादिकं मार्जनमिति वाप्यादिशुद्धिः। ए प्रक्षेपको
तन्मूलवचनानि पितामहचरणकृतायां पद्धतौ द्रष्टव्यानि॥ ॥अथारामप्रतिष्ठां वक्तुं वृक्षारोपणमा
ह भविष्यपुराणे॥ अश्वत्थमेकं पिचुमंदमेकं न्यग्रोधमेकं दश तिंतिणीं च। कपित्थबिल्वामलकत्रयं
च पंचाम्रवापी नरकं न पश्यते। पाद्मे। यत्नेनापि वराजेंद्र पिष्पलारोपणं कुरु॥ स तु पुत्रसहस्राणां मे

ज्ञा०

॥१६॥

16

कस्य वक रिष्यति। कर्त्तव्यमिति शेषः। भारत॥ कीर्तिश्च मानुषे लोके प्रेत्य चैव शुभं फलम्। अतीतानागतौ
वा मो पितृवंशो च भारत। तारयेद्दस्तरापीव तस्माद्वृक्षांश्च रोपयेत्। इत्यादि॥ मात्स्ये॥ पादपानां विधिं
वक्ष्ये तथैवोद्यानभूमिषु। तडागविधिवत्सर्वमासाद्य जगतीश्वर॥ ऋत्विग्मण्डपसंभारमाचार्यश्चापि
तादृशः। पूजयेद्ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः। सर्वौषध्युदकैः सिक्तान्पिष्टकैर्विभूषितान्। पिष्टातकं
सुगंधिचूर्णं॥ वृक्षान्माल्यैरलंकृत्य वासोभिरभिवेष्टयेत्। सूच्या सौवर्णया कार्यं सर्वेषां कर्णवेधनम्॥ अंजनं
जनं चापि दातव्यं तद्वद्धेमशलाकया। फलानि सप्त चाष्टौ वा कालधौतानि कारयेत्॥ कालधौतानि सौवर्णानि प्र
त्येकं सर्ववृक्षाणां वेद्यां तान्यधिवासयेत्। धूपोऽत्र गुग्गुलः श्रेष्ठस्ताम्रपात्रैरधिष्ठितान्। सप्तधान्ययुतान्कृ
त्वा वस्त्रगंधानुलेपनैः। कुंभान्सर्वेषु वृक्षेषु स्थापयित्वा नरोत्तम। सहिरण्यानशेषांस्तान्कृत्वा बलिं
निवेदनम्। तथा च लोकपालानामिंद्रादीनां विधानतः॥ वनस्पतेश्च विद्वद्भिर्होमः कार्यो द्विजादिभिः॥ ततः
शुक्लांबरधरा सौवर्णकृतभूषणा। सकांस्यदोहा सौवर्णशृंगाभ्यामतिशालिनी। पयस्विनी वृक्षमध्यादुत्सृ
ष्टामुदङ्मुखी। ततोऽभिषेकमंत्रेण वाद्यमंगलगीतकैः। ऋग्यजुःसाममंत्रैश्च वारुणैरभितस्तथा। तैरेव कुं
भैः स्नपनं कुर्युर्ब्राह्मणपुंगवाः। ततः शुक्लांबरधरो यजमानोऽभिपूजयेत्। गोभिर्विभवतः सर्वानृत्विगा...
समाहितः। हेमसूत्रैः सकंटकैरंगुलीयैः पवित्रकैः। वासोभिः शयनीयैश्च तथोपस्करपादुकैः। क्षीराभिषेच

राम

॥१६॥

२ मानाभावात्रो स ...

नं कुर्याच्चावद्दिनचतुष्टयं। होमश्च सर्प्पिषा कार्यो यवैः कृष्णतिलैस्तथा पालाश्यः [redacted] समिधः शस्ता...
र्थेऽह्नि तथोत्सवः। आचार्याय द्विगुणं दत्वा प्रणिपत्य विसर्जयेत्। अनेन विधिना यस्तु कुर्याद्धृष्टो सर्वं बुधः। स
र्वान्कामानवाप्नोति फलं चानंतमश्नुते। इत्यादि। अत्र जलाशयवदारामोऽप्युत्सृष्टव्य इति केचित्॥ ॥तथैतत्प्रयोगः॥
अत्र जलाशयोत्सर्गोक्तकाले सन्मुहूर्त्ते त्वधिवासनदिनात्पूर्वेद्युः कृतैकभक्तादिनियमोऽधिवासनदिने
प्रातः स्नात्वा उपविश्य अद्येत्यादी मम सर्वपापक्षयाति तानामतीतपितृकुलतारणकामो भगवत्प्रीतिकामो वा आरामोत्स
र्गं करिष्य इति संकल्प्य गणेशपूजास्वस्तिवाचनमातृपूजाभ्युदयिकश्राद्ध गुर्वृत्विग्वरणतत्पूजनमंडपपूजादेवता
तत्पूजांते। ग्निस्थापनात्पूर्वं आचार्यश्चतुरस्रपीठिकामध्ये कृतालवालेनाम्रवौषधयुदकैः सिक्तापिष्टातकैः
पंचगव्येनाभिषेकं कृत्वा सूत्रेण वेष्टयित्वा प्रतिवृक्षं स्कंधसमीपे कर्णवेधं तदुपरिप्रदेशे शलाकपानेत्रांजनं
कृत्वा गुग्गुलधूपं दत्वा स्रग्भिर्बद्ध्वा चतुरस्रपीठिकोपरि यवगोधूममाषषष्टिककंगुश्यामाकतिलव्रीहीन् कालम
कसप्तधान्यानि प्रक्षिप्य तेषु जलपूर्णान्सोपस्करान् ताम्रकलशान्स्थापयेत्। प्रतिवृक्षं कलशादिस्थापन
सेकादिकरणाशक्तो वृक्षाष्टके कुर्यादिति याज्ञिकाः। ततोऽग्निस्थापनांते गुरुर्वेद्यां बाउशारेश्वर्याद्यालोकपा
लांता देवता उत्तलाशयोत्सर्गवत्संस्थाप्य प्रतिवृक्षं सप्ताष्टौ वेति कृतसंख्याकानि स्वर्णफलानि वेद्यां कृष्णमृम

जल०

॥१७॥

करादि पात्रीस्थापने। वनस्पते वीड्वंग इति मन्त्रेण सादयेत्। अस्य प्रजापतिर्वनस्पतिस्त्रिष्टुप्। ततो ब्रह्माणं
वा विष्णुं विनायकं कमलां भैरविकां भूतधात्रीं चेति संस्थाप्य सर्वान्पूजयेत्। ततः सर्वेभ्यो बलीन्दित्वा पूर्वे कुंडा
न्प्राच्यां पदत्रयं भुवं त्यक्त्वा उत्तराशायां स्वर्गवद्यूपं निखनेत्। ततः सर्वे आज्यभागान्ते वनस्पत इति मन्त्रेणाष्टो
त्तरशतमाज्याहुतीः पलाशसमिधः कृष्णतिलाहुतीश्च जुहुयुः। ततो ग्रहादिविश्वकर्मान्तेभ्यो वा दिसमिद्भिर्यो
वै कृष्णतिलैश्च प्रत्येकमष्टाविंशति संख्याको होमः कार्यः। ततः स्विष्टकृत्। एवमधिवासनान्ते प्रातः कुंडसमीपस्थ
कलशजलैर्यजमानमभिषिंचेयुः स्नपयेयुश्च। ततो यजमानः सोपस्करां गामुदङ्मुखीमुत्सृजेत्तत्र मन्त्रः। इदं
वन पवित्रं कुरुष्व शुद्धं पूतममृतमस्तु नित्यं॥ मांतरयंतीस्सर्वतीर्थाभिषिक्तो लोकालोकत्तरतेतिर्यं वेति। ए
कवृक्षप्रतिष्ठायामिमं वृक्षमित्यूहः। तत्तसमुद्रादूर्मिः। ये वामी रोचने दिवः। इति मन्त्रद्वयमुक्त्वा जापुच्छोदके
न देवपितृन्संतर्प्य। सूयावासा भगवती रितिं ह्रीं क्षतेचहिंक्षएवतीरितिच जपेत्। ततो वनोत्सर्गं कुर्यादिति केचि
त्। सर्वैर्वा कुशयवतिलजलान्यादायाद्येत्यादि। इदं वनममुष्यादि वनस्थवृक्षाणामहं ते नाना वृक्षयुतं व
नस्पतिदेवताकं स्वीयसर्वपापक्षयपूर्वकमतीतानागतपितृकुलतारणकामो भगवत्प्रीतिकामो वा सर्वसत्वे
भ्योहमुत्सृजे। ततो जह्नितं मन्त्रद्वयं पठेत्। सर्वभूतेभ्य उत्सृष्टमार्चितद्वनमूर्जितं। रमं तु सर्वभूतानि। स्थितिभक्षोप्स
वादिभिः। सर्वेभूतेभ्यो मया दत्तमिदं वनं ततः॥ रमंतु सर्वभूतेभ्यः स्थितिभक्षोत्सवादिभिः। इति। ततो वृक्षमूलस्था

× भ्यश्चापि १

राम

॥१७॥

तला० पितजलैः पुनर्यजमानमभिषिंचयन्त्नपयेयुः। तत्र वरुणमंत्राः। सुरास्त्वामित्यादयश्च। ततोयजमानमण्डपंप्रविश्याद्येत्यादिकृतैतदारामप्रतिष्ठाकर्मणः समृद्ध्यर्थममुकगोत्रेभ्यः एताः शतंगा उष्ट षष्टिं पंचाशत षड्विंशतिं पंचविंशतिंवायथाशक्ति रुद्रदेवताः दक्षिणात्वेनयुष्मभ्यंगुर्वर्त्विग्भ्यः संप्रददइतिदत्वाहेमसूत्रकटकांगुलीयकवासः

॥१८॥ शय्यापादुकाद्युपस्कारान्त्विग्भ्योतः पात्रेगुरवादद्यात्। ततश्चापोहिष्ठेति। त्रं चंजपन्नविच्छिन्नविच्छिन्नदुग्धधारयावनत्रिः परिषिंच्यएकंविप्रंयघेष्टंदुग्धंपाययेत्। ततोगुरुतः नीकपालेभ्यः प्रागुक्तबलिंदत्वादिनचतुष्टयंवृक्षाणांस्नेषु क्षीराभिषेचनं यक्षादिपूजनं वेद्यधिवासितदेवार्चनं वानस्पत्यहोमादिवैश्वकर्मतंचकृत्वाचतुर्थदिवसे होमसमापनं। तेजलाशयोत्सर्गोक्तं चतुर्थीकर्म कुर्यात्। पूर्णाहुति होमोत्रवनस्पतिमंत्रेणेति विशेषः। नाजनागयष्टिः। नतीर्थजवेशनमितिरूपनारायणः। द्वयमपि कार्यमिति त्यन्ये। ततोभिषेकगृहप्रजाग्निप्रजाविसर्जनशय्यादानमंडपाद्युपस्करप्रतिपत्तिविप्रभोजनभूयसीदानकर्मश्च रापर्यणानिजलाशयोत्सर्गवत्॥ ॥इतिनिमांसकभट्टशंकरात्मजभट्टनीलकंठकृते भास्करे जलाशयारामोत्सर्गमयूखः॥ राम ॥१८॥

॥ ॥संवत् १७१८ शाके १५८३ पोषशुद्ध ... वडेरोचवीरेश्वरेण स्वार्थंपरार्थंचलिखितमस्ति॥ ॥शुभंभूयात्॥

शैवनंदरामस्येदं उमर्गणयस्तं स्व॰ काण्य एकादश १८